# संस्कृतवार्ता:

दिनाङ्क :- 26.05.2025 सायम् :- 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी गुजरातस्य भुज-दाहोद-नगरयो: विभिन्नानां विकासात्मक-परियोजनानाम् उद्घाटनम् आधारशिला-स्थापनं च अकरोत्।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना स्वकीयस्य कार्यकालस्य एकादश वर्षाणि पूरितानि सहैव स्थिरशासन-विकासयो: युगस्य आरम्भोपि कृत:।
- केन्द्रीयशिक्षामन्त्रिणा धर्मेन्द्रप्रधानेन उक्तं यत् अस्मिन् शैक्षणिकवर्षे भारते प्रायः पञ्चदश वैदेशीयाः विश्वविद्यालयाः स्वपरिसरं स्थापयिष्यन्ति।
- दक्षिणपश्चिम प्रावृटागमनेन महाराष्ट्र-कर्नाटक-राज्ययोः च अनेकेषु भागेषु प्रचण्डवृष्टिः अभवत्।
- आईपीएल इति विंशतिः प्रति विंशतिः क्रिकेट क्रीडा स्पर्धा मालिकायां अद्य सायं जयपुरे पंजाब किंग्स मुंबई इंडियंस दलयोः मध्ये प्रतिस्पर्धा भविष्यति ।

-----------------------------------------

<u>पीएम-भुज</u>

प्रधानमन्त्री नरेन्द्रमोदी गुजरातस्य द्विदिवसीय-यात्रावधौ अद्य भुज-नगरे चतुःशताधिक त्रिपञ्चाशत् कोटिरूप्यकाणां मूल्यस्य त्रयस्त्रिंशत् परियोजनानां आधारशिलाम् अस्थापयत्। एताषु परियोजनासु कण्डला-पोत-पत्तनसंरचना, सौर-ऊर्जा, विद्युत्-सञ्चारः, मार्गनिर्माणः भवन-विकासः इत्यादि-प्रमुख-क्षेत्राणि सन्ति। प्रधानमन्त्री भुजनगरे भव्यमार्गप्रदर्शनमपि करिष्यति। आकाशवाण्याः वार्ताहरः उक्तवान् यत् सिन्दूराभियानानंतरं प्रधानमन्त्रिणः -मोदिनः -सीमवर्ति क्षेत्रस्य एषा प्रथमा यात्रा अस्ति। अद्य आरब्धाभिः परियोजनाभिः कच्छ-जामनगर,

अमरेली, जूनागढ, गिर, सोमनाथ, अहमदाबाद, तापी महिसागर चेति क्षेत्राणि लाभान्विताः भविष्यन्ति।

-------------------------------------------

<u>पीएम-दाहोदः</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य उक्तवान् यत् एक दशमलव चत्वारि अरब भारतीयाः एकीभूताः सन्ति, विकसितभारतस्य निर्माणे अथक-कार्यं कुर्वन्ति। आत्मनिर्भरतायाः उपरि बलं प्रददता श्रीमोदिना उक्तं यत् भारतं विकसितराष्ट्रं कर्तुं यत्किमपि आवश्यकं तत् सर्वं, देशेव निर्मितं भवेत् इति आवश्यकम् अस्ति। गुजरातस्य दाहोद-नगरे प्रायः चतुर्विंशति-सहस्र-कोटिरूप्यकाणां बहुविधविकासपरियोजनानां आधारशिलास्थापनं उद्घाटनं च कृत्वा श्रीमोदिना इदं उक्तम् ।

आन्तरिकनिर्माणस्य वृद्धिं उद्धृत्य सः उक्तवान् यत् भारते निर्मिताः रेलमार्गघटकाः अधुना इङ्ग्लैण्ड्, फ्रान्स्, मेक्सिको, जर्मनी इत्यादिषु देशेषु निर्यातिताः भवन्ति । सः सूक्ष्म-लघु-मध्यमोद्यम -संस्थानां, यूनां च प्रशंसाम् अकरोत् यत् ते वृद्धिं अग्रे सारयन्ति । सिन्दूराभियानस्य विषये प्रवदन् प्रधानमन्त्री मोदी अवदत् यत् एतत् केवलं सैन्यकार्यं न, अपितु भारतीयमूल्यानां भावानां च अभिव्यक्तिः अस्ति।

श्रीमोदिना राज्यसर्वकारस्य रेलादिक्षेत्रसम्बद्धाः विविधाः विकासपरियोजनाः अपि प्रारब्धाः। एतेषु, वेरावल-अहमदाबाद-योः मध्ये वन्दे-भारत-एक्सप्रेस्-रेलयानानि, वालसाड्-दहोड्-स्थानकयोः मध्ये एक्स्प्रेस्-रेलयानानि च सन्ति । प्रधानमन्त्रित्वेन शपथग्रहणस्य एकादश वर्षाणि पूर्णानि कृत्वा श्रीमोदी गुजरातेन, राष्ट्रेण च तस्य उपरि स्थापितस्य विश्वासस्य स्मरणं कृतवान्।

ततः पूर्वं प्रधानमन्त्री मोदी दहोद-नगरे भारतीयरेलवे-इत्यस्य लोकोमोटिव-निर्माण-संयंत्रस्य उद्घाटनं कृतवान्। प्रधानमन्त्री अद्य प्रातः द्विदिवसीययात्रायां गुजरातनगरम् आगत्य द्वयाशीति सहस्रकोटिरूप्यकाणां विविधविकासकार्यक्रमाणाम् आरम्भः कृतवान्।

------------------------------------------

## पीएम - एकादशवर्षाणि

प्रधानमन्त्रिणः नरेन्द्रमोदिनः कार्यभारस्य अद्य एकादशवर्षाणि पूरितानि। चतुर्दशोत्तर द्विसहस्रतमे वर्षे अस्मिन्नेव दिने श्रीमोदिना भारतस्य प्रधानमन्त्रीत्वेन शपथग्रहणं कृतवान् आसीत्। एतेन देशस्य आधुनिकराजनैतिक-इतिहासस्य एकं महत्वपूर्णं परिवर्तनम् अभवत्, यतः एतेन भारते गठबन्धनस्य राजनीतेः त्रिंशत् वर्षाणां युगस्य समाप्तिः अभवत्। यत्र जनाः भाजपेति दलाय स्पष्टं निर्णायकं च जनादेशं प्रदत्तवन्तः। भारतीयानां ऐतिहासिकं जनादेशं संप्राप्य नरेन्द्रमोदी भारतस्य चतुर्दशतमः प्रधानमन्त्रीरूपेण शपथं गृहीतवान् । अस्मिन्नेव दिने चतुर्दशोत्तर द्विसहस्रतमे वर्षे मईमासस्य षड् विंशतिः दिनाङ्के सायं राष्ट्रपतिभवनस्य प्राङ्गणे इतिहासे नूतनाध्यायस्य लेखनम् जातम् । नरेन्द्रमोदिनि देशस्य जनाः एकं गतिशीलं, निर्णायकं, विकासप्रधानं च नेतारं पश्यन्ति यः एककोटिभारतीयानां स्वप्नानां आकांक्षाणां च आशायाः रश्मिरूपेण उद्भूतः।

विकासे तस्य ध्यानं, विस्तरेण दृष्टिः, निर्धनानाम् अत्यन्तं निर्धनानाम् च जीवने गुणात्मकं परिवर्तनम् आनेतुं प्रयत्नाः च नरेन्द्रमोदिनं देशस्य एकः लोकप्रियः नेता रूपेण विनिर्माति। श्रीमोदिनः प्रधानमन्त्रित्वेन कार्यभारग्रहणं सबकासाथ, सबका विकास, सबका विश्वास, सबका प्रयास इति मन्त्रेण सह विकासोन्मुखराजनीतेः आरम्भः आसीत्। विगतेषु एकादश वर्षेषु देशे सर्वेषु क्षेत्रेषु महत्वपूर्णानि परिवर्तनानि दृष्टानि, नूतनः विश्वासः च प्राप्तः। सामान्यजनानां कृते आधारभूतसंरचनासु सुधारः, आधारभूतसंरचनानां सम्वर्धनं, अर्थव्यवस्थां सुदृढीकरणं च आरभ्य वृत्त्यावसरानां सृजनं यावत्, आन्तरिकसुरक्षां सुनिश्चित्य भारतस्य वैश्विकबिम्बं च वर्धयितुं, नरेन्द्रमोदिनः नेतृत्वेन संपूर्णेपि विश्वे नूतनं परिचयं प्रदत्तम्। नीतिपक्षाघातस्य रिक्थं त्यक्त्वा भारतं विश्वस्य चतुर्थं बृहत्तमं अर्थव्यवस्था सञ्जातम्। सम्प्रति भारतं मोदिनः सशक्तनेतृत्वे सप्तचत्वारिंशदधिक द्विसहस्रतम वर्षपर्यन्तं विकसितराष्ट्रं भविष्यति इति आकाङ्क्षा अस्ति।

------------------------------------------

## प्रधान-लिवरपूलविश्वविद्यालयः

केन्द्रीयशिक्षामन्त्रिणा धर्मेन्द्रप्रधानेन उक्तं यत् अस्मिन् शैक्षणिकवर्षे भारते प्रायः पञ्चदश वैदेशीयाः विश्वविद्यालयाः स्वपरिसरं स्थापयिष्यन्ति। सः अवदत्, अस्मिन् विषये प्रशासनेन विदेशीयविश्वविद्यालयानाम् अनुमतिः प्रदत्ता अस्ति। अद्य नवदिल्ल्यां यूनाइटेड् किङ्ग्डम्-देशस्य लिवरपूल्-विश्वविद्यालये आशयपत्र-हस्तांतरण-समारोहं सम्बोधयन् श्रीप्रधानेन एतत् प्रकाशितम्। सः एतां सहभगिताम् एकां प्रतीकात्मक रूपेण वर्णितवान् तथा च वैश्विक उच्चशिक्षायां भारतस्य विश्वसनीयसहभागित्विद्धवस्य भावं वर्णितवान्। वार्ताहरान् सम्बोधायन् मन्त्री अवदत् यत् लिवरपूलविश्वविद्यालयः आगामिवर्षात् आरभ्य कार्यं करिष्यति। सः सूचितवान् यत् आस्ट्रेलिया-देशस्य द्योः विश्वविद्यालयोः गुजरातनगरे शैक्षणिकसत्रं प्रारब्धम् अस्ति।

-------------------------------------------

**ऋतु-विभाग:**

भारतीय-ऋतु-विज्ञान-विभागेन तटीय क्षेत्रेषु अतिवृष्टि: अनुमानितमस्ति। दक्षिण कर्नाटक, केरल, तमिलनाडु पुडुचेरी चेत्येतेषु क्षेत्रेषु अतिवृष्टेः संभावना वर्तते। ऋतुविज्ञान विभागेन अगामि दिनद्वयो: दिल्ली, आंध्र प्रदेश, गुजरात, हरियाणा, चंडीगढ़, हिमाचल प्रदेश, झारखंड, पंजाब राजस्थान चेत्येतेषु राज्येषु अतिवृष्टेः, तीव्रवायोः च अनुमानं प्रख्यापितमस्ति।

-------------------------------------------

**शतरंज:**

स्टावेंजर नगरे अद्यारभ्य आरभ्यमाणे नॉर्वे शतरंज टूर्नामेंट इत्यस्याः प्रतिस्पर्धायाः प्रथमे चक्रे विश्वस्तरीयः शतरंज क्रीडकः डी गुकेशः, मैग्नस कार्लसन इत्यमुं सम्मुखी करिष्यति। अपरतः नवोदितः अर्जुन एरिगैसी चीनस्य वेईयी इत्यमुं सम्मुखी करिष्यति। महिला-वर्गे प्रथमे चक्रे कोनेरू हम्पी, आर वैशाली चोभयोः मध्ये स्पर्धा भविष्यति ।

-------------------------------------------

## आईपीएल:क्रिकेट

आईपीएल इति विंशतिः-प्रति विंशतिः क्रिकेट-क्रीडा-स्पर्धा-मालिकायां अद्य सायं जयपुरे पंजाब-किंग्स, मुंबई-इंडियंस दलयोः मध्ये क्रीडा भविष्यति । स्पर्धायाः आरम्भः सायं सार्धसप्तवादने भविष्यति।

**।। इति वार्ताः ।।**